# 2014

## M.A. Part - I Examination

## SANSKRIT

### Paper II

Time : 4 Hours

Full Marks : 100

*The figures in the margin indicate Full Marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**First Half**
**(Marks - 60)**
**Unit - I**

1) अधो निर्दिष्टेषु सूत्रेषु *चतुर्णां* व्याख्या कार्या- 3 x 4

a) हलन्त्यम्

b) मुखनासिकावचनोऽनुनासिकः

c) तपरस्तत्कालस्य

d) स्वं रूपं शब्दस्याशब्दसंज्ञा

e) इको गुणवृद्धी

f) आद्यन्तौ टकितौ

g) षष्ठी स्थानेयोगा

h) तस्मादित्युत्तरस्य

2. अधो लिखितेषु दीक्षितवचनेषु कस्यचित् 8
एकस्याशयः सप्रसङ्गं स्पष्टीक्रियताम्-

a) प्रत्याहारेष्वितां न ग्रहणम्, अनुनासिक इत्यादिनिर्देशात्

b) ह्रस्वस्यावर्णस्य प्रयोगे संवृतं,

प्रक्रियादशायान्तु विवृतमेव

c) यत्रानेकविधमान्तर्यं तत्र स्थानत

आन्तर्यं बलीयः

d) अष्टाभ्य औशित्यादौ आदेः परस्येत्येतदपि

परत्वादनेन बाध्यते।

**Unit - II**

3. अधस्तनेषु सूत्रेषु यथेच्छं *द्वयोः* व्याख्या कार्या- 3 x 2

a) वान्तो यि प्रत्यये

b) अचः परस्मिन् पूर्वविधौ

c) ईदूदेद् द्विवचनं प्रगृह्यम्

d) कृत्तद्धितसमासाश्च

e) ङ्याप्प्रातिपदिकात्

4. अधो दत्तेषु दीक्षितवचनेषु कस्यचिदेकस्य आशयः स्पष्टीकरणीयः - 6

a) 'प्रत्यये' किम् - प्रत्ययविशिष्टस्य ततोऽप्यधिकस्य वा मा भूत् ।

b) 'संनिपातलक्षणो' इति परिभाषा तु नेह प्रवर्तते

c) अनेनेह यकारस्य स्थानिवद्भावेनाच्त्व-

माश्रित्य 'अनचि' इति द्वित्वनिषेधो न शङ्क्यः, 'अनल्विधौ' इति तन्निषेधात्

d) 'तन्निमित्तस्यैव' इति किम्।

ओयते । ओयत ।





5. अधस्तनेषु पदेषु *द्वयोः* सन्धिप्रकारः ससूत्रं प्रदर्श्याम् - 2 x 2

a) गव्यूतिः b) पावकः c) गङ्गोदकम् d) उपैति

6. कयोश्चिद् *द्वयोः* साधनप्रक्रिया ससूत्रं प्रदर्शनीया- 2 x 2

a) रामान् b) रामाणाम् c) सर्वस्मात् d) हरये

**Unit - III**

7. यथेच्छं *त्रयाणां* सूत्राणां व्याख्या कार्या- 3 x 3

a) लः कर्मणि च भावे चाकर्मकेभ्यः

b) स्वरितञितः कर्त्रभिप्राये क्रियाफले

c) परोक्षे लिट्

d) तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्

e) कृञ्चानुप्रयुज्यते लिटि

f) एकाच उपदेशेऽनुदात्तात्

8. अधो निर्दिष्टासु पङ्क्तिषु कस्याश्चिदेकस्याः व्याख्या कार्या- 5

a) 'प्रहासे' किम् - यथार्थकथने मा भूत्।

b) येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात् ।

तेन भिनत्तित्यादावनेकव्यवहितस्येको न गुणः।

c) पूर्ववदेवात्मनेपदं न तु - तद्विपरीतमिति।

तेन कर्तृगेऽपि फले इन्दञ्चकारेत्यादौ न तङ्।

d) खयां चरः तत्रापि प्रकृतिजशां प्रकृतियशः,

प्रकृतिचरां प्रकृतिचर इति विवेकः,

आन्तरतम्यात्।

9. अधस्तनेषु पदेषु *द्वयोः* साधनपद्धतिः ससूत्रं प्रदर्श्यताम् - 3 x 2

a) भवन्ति b) भवितारौ c) भविष्यामि d) एधेते e) एधताम्

**Second Half**
**(Marks - 40)**

1) कयोश्चिद् *द्वयोः* प्रश्नयोः समाधानं कार्यम् ।

क) भारोपीयभाषापरिवारस्य भाषाणां प्रधानं भागद्वयं किम् ? तत्र ईदृशस्य विभाजनस्य किं मूलम् ? एतासु भाषासु प्राचीनभारतीयार्य-इटालिकभाषयोः परिचयः संक्षेपेण प्रदीयताम्। 1 + 4 + 10 = 15

ख) ध्वनि-नियमस्य स्वरूपं निरूप्य ग्रासमन-सूत्रस्य विवेचनं सोदाहरणं प्रस्तूयताम् 15

ग) वैदिकवाङ्मयस्य भाषागतं वैशिष्ट्यं यथायथम् उपस्थाप्यताम्। 15

घ) संस्कृतभाषायाम् अनार्यभाषाणां प्रभावः सम्यगालोच्यताम्। 15

2. अधोलिखितेषु कमपि *द्वयम्* अधिकृत्य टीका लेख्या - 5 x 2 = 10

(क) समीकरणम्

(ख) स्वरभक्तिः

(ग) वर्णागमः

(घ) स्वरसंयोगः

---